Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# द्वितीयाविभक्त्यर्थप्रबोध:

**डॉ.नवीनकुमारमिश्र:**
संविदाध्यापक:,व्याकरणविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:, क.जे.सोमैया.मुम्बईपरिसर:, मुम्बई ।

**Article Info**
Volume 5, Issue 3
Page Number : 01-12
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 12 May 2022

**शोधपत्रसार:-** अतीवमृदुमनस्कानां संस्कृतानुरागीणाञ्च कृते द्वितीयाविभक्तिपदसहितवाक्यप्रयोगविषयकं विशेषप्रतिपत्तिं वारणायायेदं शोधपत्रं मया प्रस्तूयते । जनेषु संस्कृतप्रचारप्रसाराय संस्कृतवीराणां कृते इदं पाथेयं भवति। स्वरादिनिपातमव्ययम् इति सूत्रगतमव्ययानां सार्थसारणीकरणम्। अत्रानेकविधाव्ययानां भेदा:– समुल्लिखिता: सन्ति । छात्रेभ्य:अव्ययान् ज्ञातुमत्र प्रयत्न:विहित:।

**शोधबिन्दव:**-कारकविभक्ति:–कर्मद्वितीया उपपदविभक्ति:–अभित:,परित:,उभयत: । कर्मप्रवचनीयवुभक्ति:–द्वितीयाविभक्तिपदसहितवाक्यप्रयोगे तेषां स्वरूपप्रत्यये संस्कृतानुरागीणां जिज्ञासूनाञ्च कृते फलवदिदं शोधपत्रम् ।

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।**
**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नम: ।। पा.शि.**

तत्र प्रथमाविभक्त्यारभ्य सप्तमीविभक्तीं यावद् सप्तविभक्तय: भवन्ति । एताषां विभक्तीनामर्थबोधनाय मञ्जूषादिग्रन्थानां समालोडनं विहितम् । अमौट्शस:द्वितीयाविभक्ति:विभक्त्यर्थस्तु आश्रयोऽर्थ: । क्रियाजन्यफलाश्रयकर्म कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम् । यथा चैत्र: तण्डुलं पचति,राम: ग्रामं गच्छति,गुरु: शिष्यान् पाठयति । तत्र कर्मसञ्ज्ञाविधातुं प्रसिद्धसूत्रं **कर्त्तुरीप्सिततमं कर्म (पा.सू.1.4.49)** इति । कारकाधिकारे कर्मसञ्ज्ञाविधायकानि दशाधिकानि सूत्राणि सन्ति । किञ्च भाष्ये इदं विहाय इतरेषां सूत्राणां प्रत्याख्यानं वर्त्तते । अत: कर्मणि द्वितीयेति शास्त्रेण द्वितीयाविभक्ति: भवति । इह द्वितीयाविभक्त्यर्थ:सोदाहरणं निरुप्यते ।

**विभक्तिलक्षणम्-**

**विभक्तिश्च 1.4.104** सुप्तिङौ विभक्तसञ्ज्ञौ स्त: । तत्र सु औ जस् इत्यादीनां त्रिकाणां प्रथमादय: सप्तम्यन्ता: प्राचां सञ्ज्ञा:। ताभिरिहापि व्यवहार: । यथा – देवदत्त:,गौर्वाहीक:,अग्निसोम:,पचति,गामानय,गौरनुबन्ध्य:–तिष्ठति इत्यादय: ।

**विभक्त्यर्थ:**

**सुबर्थ:-प्रथमार्थ:-** **कर्ताकर्मकरणञ्च सम्प्रदानं तथैव च ।**
**अपादानमधिकरणमित्याहु: कारकाणि षट् ।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

क्रियानिष्पादकत्वं कारकत्वम् ,क्रियान्वितविभक्त्यर्थान्वितत्वं क्रियानिर्वर्तकत्वम् । प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम् ।एतदतिरिच्य अन्यकारकनिष्ठो व्यापारः न प्रकृतधातुवाच्यः। तद्यथा –वह्निना पचतीत्यत्र वह्निनिष्ठः प्रज्वलनादिः।अन्यकारकनिष्ठव्यापाराश्रयस्य कर्तृत्ववारणाय धातुवाचयेति । तत्र काकरकमात्रे प्रथमैव **तिङसमानाधिकरणे प्रथमा,अभिहिते प्रथमा** इति वार्तिकाभ्यां प्रथमाविभक्तिः । सूत्रदृष्ट्या तु कर्त्तृकर्माद्यर्थकप्रत्ययेन कर्त्रदेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एव । एतस्य चाख्यातार्थकर्त्रादिनाऽभेदान्वयेन प्रथमार्थस्य कारकत्वम् । अत एवाख्यातार्थद्वारकक्रियान्वयात् तदर्थस्य क्रियाजनकत्वादस्याः कारकविभक्तित्वेन व्यवहारः। चैत्रो भवतीत्यत्र एकत्वावच्छिन्नचैत्राभिन्नकर्तृकं भवनमिति बोधः। आख्यातकृदादिना कर्त्रादेरभिधाने ऽपिप्रथमयाऽनुद्भुतकर्त्तृत्वादिशक्तिः निरूप्यते इति तात्पर्यम् । कर्माख्याते तु चैत्रेण ग्रन्थो लिख्यते इत्यत्र चैत्रकर्त्तृकवायापारजन्य एकत्वावच्छिन्नग्न्थाभिन्नकर्मनिष्ठ अक्षरविन्यास इति ।

सम्बोधनप्रथमार्थस्यापि अनुवादे उद्देश्यत्वेन युष्मदर्थाऽभेदेन विधेयक्रियायामन्वयात् क्रियाजनकत्वरूपं कारकत्वम् ।कृष्ण! त्वं पठेत्यादौ अभिमुखीभवद्देवताभिन्नयुष्मदर्थोद्देश्यकप्रवर्तनादिविषयो ज्ञानस्वीकरणमिति बोधः।

**द्वितीयार्थः-**

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।**

**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।** शब्दकौस्तुभःका.24

द्वितीयाविभक्ति–तृतीयाविभक्ति– सप्तमीविभक्तीनाम् आश्रयोऽर्थः । क्रियाजन्यफलाश्रयकर्म कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम् । इति ईप्सिततमत्वकर्मलक्षणम् । गां दोग्धीत्यादौ पयोवृत्तिर्यो विभागस्तदनुकूलो व्यापारो गोवृत्तिः,तदनुकूलश्च गोपवृत्तिः। इह पयसः कर्मत्वसिद्धये प्रयोजत्वनिवेशः। जन्यत्वनिवेशे तन्न स्यात् । प्रयागात् काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति । न हि विभागःप्रकृतधात्वर्थ,किन्तु नान्तरीयकतया गमने उत्पद्यते । प्रयागस्य फलतावच्छेदकसम्बन्धेन फलाश्रयत्वेनानुद्देश्यत्वाच्च ।

**तृतीयार्थः-** **क्रियायाःपरिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**

**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ।।** वा.प.

**कर्तृकरणयोस्तृतीया**(पा.अ.2.3.18) इति करणसञ्ज्ञाविधायकम् ।तत्र करणत्वञ्च स्वनिष्ठव्यापारा–व्यवधानेन फलनिष्पादकत्वं करणत्वम् । रामेण बाणेन हतो बालीत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पू–र्वमपि कर्त्तरि सत्वात् । अत्र फलवती क्रिया भवति । रामाभिन्नकर्त्तृनिष्ठव्यापारप्रयोज्यो यो बाणनिष्ठो व्यापारस्त–ज्जन्यं यत् प्राणवियोगरूपं फलं तदाश्रयो बालीति बोधः। रामो बाणेन बालिनं हन्तीत्यादौ कर्त्तृप्रत्यये बाणव्यापार–जन्यो यो बालिनिष्ठः प्रणवियोगस्तदनुकूलो रामकर्त्तृको व्यापार इति बोधः।

**चतुर्थ्यर्थः-** **अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम् ।**

**प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम् ।।**

कारकचतुर्थ्याः सम्प्रदानत्वशक्तिमानर्थः।सा शक्तिश्च ततद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छयाविषयो यस्तन्नि–ष्ठा,कर्मणा यमभिप्रैतीति शास्त्रात् सम्प्रदानसञ्ज्ञा । यथा राजा विप्राय गां ददाति ,गुरुः शिष्याय ज्ञानं ददाति इत्यादौ सम्प्रदानं भवति तत्र सम्प्रदाने चतुर्थीविभक्तिः। सम्प्रदानचतुर्थ्यर्थ उद्देश्यः। तथा च ब्राह्मणोद्देश्यकं गोकर्मकं दानमिति बोधो,मैत्रोद्देश्यकं वार्त्ताकर्मकं कथनमिति च । क्रियया यमभिप्रैति स सम्प्रदानमिति वृत्तिकारमते तु अकर्मकक्रियोद्देश्यत्वं

सम्प्रदानत्वमिति लक्षणपरम् । पत्ये शेते इत्यादि । पत्युद्देश्यकं नायिकाकर्तृकं शयनमिति बोध: तत्तत्सञ्ज्ञासूत्रैस्तत्तदर्थे तत्तत्कारकशक्तिमत्वबोधनात् । हरये रोचते भक्ति:। विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूल-स्तत्समानाधिकरणो व्यापारो रुचेरर्थ:। तत्फलभूतप्रीते: समवायेनाश्रयो हरि: सम्प्रदानत्वशक्तिमान्,रुच्यर्थानां प्रीयमाण इत्यनुशासनात् । समवायसम्बन्धावच्छिन्नप्रीत्यनुकूलो व्यापार: प्रीधात्वर्थ:। अत एव हरिं प्रीणयतीत्यादिसिद्धि:।

**पञ्चम्यर्थ:-** **निर्दिष्टविषयं किञ्चिदुपात्विषयं तथा।**
**अपेक्षितक्रियञ्चेतित्रिधाऽपादानमुच्यते।।**

**ध्रुवमपायेऽपादानम् 1.4.24** इति अपादानविधायकं प्रसिद्धशास्त्रम् । अपायो नाम विश्लेष:तज्जनकक्रिया,तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भाव:। पञम्या अपादानत्वशक्तिमानर्थ:। सा शक्तिश्च प्रकृतधतूपात्तविभागजनकव्यापारानाश्रये सति प्रकृतधात्वर्थविभागाश्रयो यस्तद्वृत्ति:।ध्रुवमपाय इति सूत्रात् । अवधिभावोपगमातिरिक्तावधित्वोपयोगिव्यापारानाश्रयत्वं ध्रुवपदार्थ:।अपाये गतिविशेषे सत्युक्तध्रुवत्ववदपादान-मिति सूत्रार्थलाभ: । यत्र साक्षाद्क्रियया विभागजनकक्रिया निरिदिश्यते,तन्निर्दिष्टविषयम् । यथा अश्वात्पतति ।यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्,यथा बलाहकाद्विद्योतते विद्युत् ।नि:सरणाङ्गे विद्योतने द्युतिर्वर्त्तते ।

**षष्ठ्यर्थ:-** **भेद्यभेदकयोश्चैकसम्बन्धोऽन्योन्यमिष्यते ।**
**द्विष्ठो यद्यपि सम्बन्ध: षष्ठ्युत्पत्तिस्तु भेदकात् ।।**

**षष्ठी 2.2.8** राज्ञ: पुरुषो राजपुरुष: इत्यादौ प्रसिद्धा उक्ति एकशतं षष्ठ्यर्थ इति षष्ठीस्थानेयोगेति । षष्ठ्यर्थ: सम्बन्धत्वेन तत्तदरूपेण च स्वस्वामिभावादि: सम्बन्ध:,सम्बन्धत्वेन क्रियाकारकभावश्च । अत एवानेकसम्बन्धसत्वेऽपि स्वत्वादिसम्बन्धविशेषतात्पर्येण चैत्रस्य नेदं वास इति प्रयुज्यते । द्वितीयादितश्च क्रियाकारतभावस्य तत्तद्रूपेणैव ज्ञेय:,तथैवानुभवात्। । मातु:स्मरतीत्यादौ च तत्तद्रूपेणबोधे द्वितीयादीनां बाधिकानां सत्वात् सम्बन्धत्वेनैव बोध:। मातृसम्बन्धिस्मरणमिति । तत्र प्राञ्च- अज्ञापि क्रियाकारकभावमूलकं विशेषणत्वरूपं विषयत्वमेव निमित्तत्वमेव वा तत्वेन सम्बन्धत्वेन वा विवक्षितम् । अत एव पर्वतस्य वृक्षा इति न, वृक्षपर्वतयोराधाराधेयभावमूलकसम्बन्धाभावात् ।

**सप्तम्यर्थ:-** **कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।**
**उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।**

**आधारोधिकरणम् 1.4.45** अधिकरणसप्तम्या अधिकरणत्वशक्तिमानर्थ: । सा च शक्ति: कर्तृकर्मद्वारा क्रियाश्रयनिष्ठा अधिकरणसूत्रबलात् । काल:क्रियाया आधारसत्वेऽपि कारकाधिकारे तरतमयोगो नास्तीति परम्परया क्रियाधारस्यापि ग्रहणम् । अधिकरणस्त्रिधा-

**उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु।**
**उपकारात्तु भिद्यन्ते संयोगिसमवायिनाम् ।**।वा.प.

औपश्लेषिकवैषयिकाभिव्यापकेषु त्रिष्वपि उपश्लेषोऽस्त्येव उपकार:सम्बन्धस्तद्भेदात्तु त्रित्वेन व्यवहार:। कटे आस्ते इत्यादौ संयोगिन्याधारे कतिपयावयवव्याप्त्यैव सम्बन्ध:। तिलेषु तैलमित्यादौ समवायिनि समस्ताव–यवव्याप्त्या खे शकुनय इत्यत्राकाशस्य तात्विकावयवाभावात् कल्पितदेशत्वाद् वैषयिकत्वं कल्पितदेशापेक्षया चात्राप्युक्तान्यतर उपरश्लेष:। गुरौ वसतीत्यत्र शिष्यस्य गुर्वेधीनायां वृत्तौ वैषयिकाधिकरणं गुरु:,उपश्लेषोऽत्र बौद्ध:। युद्ध संनह्यतीत्यत्र युद्धोद्देशेन कवचादिसंसिद्धिप्रवृत्तेर्युद्धविषय:। गङ्गायां घोष: इत्यत्र गङ्गाशब्द: सामीप्यात् देशवृत्तिरित्यौपश्लेषिकमेव तत् ।अत्र गङ्गायां सामीप्याद्देशवृत्यधिकरणत्वारोपो बोद्ध्य:। शत्रोरभावे सुखमित्यादौ बौद्धमेव ।

**तिङर्थ:-** **फलव्यारयोर्धातुराश्रये तु तिङः समृता:।**

**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।। शब्दकौस्तुभ:का.2**

आश्रये त्विति फलाश्रये,व्यापाराश्रये चेत्यर्थ:। विक्लित्त्यादि फलम् । फलाश्रय:कर्म्म,व्यापाराश्रय: कर्ता । तिङर्थ: कर्तृकर्मसङ्ख्याकाला:। तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे सङ्ख्याकर्तृप्रत्यये कर्त्तरि,कर्मप्रत्यये कर्मणि,समानप्रत्ययोपात्तत्वात् । सर्वाधार: काल:पर्वता सन्ति,पर्वता: आसन् । पर्वता: भविष्यन्ति इत्यादौ आधार: काल एव । कालस्तु व्यापारे विशेषणम् ,तथाहि **वर्त्तमाने लट्** (पा.अ.3.2..123) इदनतु कालप्रकारकबोधनायास्य व्यापारेऽन्वय:। **ल:कर्मणि चाभावे चाकर्मकेभ्य:**3.4.69 इति शास्त्रेण सकर्मकेभ्य: धातुभ्य: लकारा: कर्त्तरि कर्मणि च भवन्ति । अकर्मकेभ्य: धातुभ्य: लकारा: कर्त्तरि भावे च भवन्ति । तत्र च धात्वर्थकथने **आश्रये तु तिङः स्मृता:** इत्युक्त्या फलाश्रय: कर्म,व्यापाराश्रय: कर्ता च तिङर्थ:। तत्र **अनन्यलभ्यो हि शब्दार्थ:** इति न्यायायत् फलव्यारयोर्धातुलभ्यत्वेन आश्रयमात्रं तिङर्थ: **द्वयेकयोर्द्विवचनैकवचने 1.4.22 ,वर्त्तमाने लडित्यिना** चैकवाक्यतायां सङ्ख्या, कालश्च तिङर्थ: ।

**मीमांसकानां जिज्ञासा-** किं लक्षणया आक्षेपात् प्रथमान्तपदाद्वा कर्तृकर्मणो: प्रतीते:अनयो: कर्तृकर्मणोराख्यातार्थत्वे मानं भवति वा ? तत्र वैयाकरणा: वदन्ति – लक्षणया आक्षेपात् प्रथमान्तपदाद्वा कर्तृकर्मणो: प्रतीते:अनयो: कर्तृकर्मणोराख्यातार्थत्वे मानाभाव: । तिङ:लक्षणयाऽश्रयबोधकत्वे,ततो भवनाबोधानुपपत्ते: युगपद्वृत्तिविरोधात् । आक्षेपात् तत्राक्षिप्तस्य चैत्र: तण्डुलं पचतीत्यादौ प्रथमान्तार्थमुख्यविशेष्यक: शाब्दबोधासम्भव: । तत्र प्रथमान्तचैत्रादिपदादपि आश्रयता न प्रतीयते – **ल: कर्मणीत्यनुशासनेन** तत्र कर्त्तरीत्यस्यानुकर्षणेन च तयोरर्थयोरेवविधानेन तद्विरोधापत्ते: । नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादायशसादिविधानवत् तिबादिनिष्ठां बोधकताशक्तिं लकारे प्रकल्प्य **ल: कर्मणीति सूत्रेण** कर्तृकर्मणोस्तिङो विधानात् । प्रकृतसूत्रेभावप्रधाननिर्देशेन कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे । तथा च कर्तृत्वं कृति:,कर्मत्वं फलमेवार्थोस्त्विति न शक्यम् । फलव्यारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र कल्पनाऽयोगात् । पचतीत्यस्य पाकं करोतीति विवरणात् फलमात्रमेव धात्वर्थ:,तिङस्तु व्यापारार्थक:इति मीमांसकमतमयुक्तम् । अर्थाधिकारानुरोधेन **कर्त्तरि कृदिति 3.4.67** सूत्रस्य कर्त्तरीति पदस्य तुल्ययोगक्षेमन्यायेन अन्यार्थबोधकानुपपत्ते:।

आक्षेप:–कृतामिव आख्यातानामपि कर्तृवाचित्वमस्तु । भावनाया:आक्षेपलभ्यत्वे लक्षणाया: प्राधान्यं न स्यातदिति ।

समाधानम् – भावनाया:आक्षेपलभ्यत्वे लक्षणाया: प्राधान्यात् । कृतामिव आख्यातानामपि कर्तृवाचित्वं नास्ति । तथाहि– घटमानय इत्यादौ आक्षिप्तव्यक्तेरपि प्राधान्यवदुत्पत्ते:। पचतीत्यादौ पाकं करोतीति विवरणदर्शनात् भावनाया: वाच्यत्वमपि न सिद्धयति । पाकानुकूलवत: कर्तुरपि विवरणविषयत्वाविशेषात्। विवरणस्य स्वस्वबोधानुसारित्वात् ।

कर्तुर्विवरणं तात्पर्यार्थविवरणं पाकं करोतीत्यशबादार्थकर्मत्वविवरणवत्,इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकं न भवति । भावनायामपि तुल्यत्वात् ।

ननु कर्त्राक्षिप्तभावनायाः कृदन्तेऽप्रधान्यवत् तिङन्तेऽप्रधान्यभिया आख्यातवाच्यत्वमावश्यकमिति । पक्ता देवदत्त इतिवत् पचति देवदत्त इत्यत्र अभेदान्वयदर्शनेन कर्तुर्वाच्यत्वस्यावश्यकत्वात् । सोमेन यजेत,स्तोकं पचति,राजपुरुष इत्यादौ अभेदान्वयबोधदर्शनेन अभेदबोधे समानविभक्तिकत्वमिति नियमस्याऽप्रयोजकत्वात् ।

लक्षणया कर्तुरुक्तत्वात् न तत्र सामानाधिकरण्यम् । अरुणया पिङाक्ष्यैकहायन्या सोमं क्रीणाततीति वाक्ये द्रव्यानुक्तेः कुत्रान्वयरिति संदेहः। तत्र स्ववाक्योपात्तद्रव्ये एवान्वय इत्यारुण्याधिकरणोच्छेदापत्तेः पिङाक्ष्यादियौगिकानां द्रव्यवाचकत्वसाधकस्य सामानाधिकरपण्यस्य सम्बन्धि लक्षणैवोपपत्तेः इति कर्तृकर्मणी तिङर्थौ स्तः । कर्तृकर्मसङ्ख्याकालाःतिङर्थाः। तत्र कर्तृकर्मणी फलव्यापारयोराधाराधेयभावसम्बन्धेन विशेषणे । सङ्खया कर्तृप्रत्ययसमभिव्याहारे कर्तेति,कर्मप्रत्ययसमभिव्याहारे कर्मणि प्रकारतयाऽन्वेति । एकप्रत्ययजन्योपस्थितिविषयत्वात् । किञ्च आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति आखातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति । कार्यकारणभावः। तत्र न्यायविदः- एकपदोपात्तयोरेकार्थान्वयित्वस्य न्याय्यत्वात् आख्यातार्थसङ्ख्यायाः प्रथामान्तार्थे एवान्वयः। तथा च आख्यातार्थसङ्ख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरित्याहुः तन्न। चन्द्र इव मुखं दृश्यते ,देवदत्तो भुक्त्वा व्रजतीत्यादौ चन्द्रक्तावार्थयोराख्यातार्थानन्वयात् उक्तकार्यकारणभावे इतरविशेषणताऽनापन्नार्थविषयकोपस्थितिः कारणमित्येवम्रूपो वाच्य इति अतिगौरवम् ।

कालस्तु धात्वर्थव्यापारेविशेषणम् समानप्रत्ययोपात्तत्वात् सङ्ख्यावत् कर्तृकर्मणोरेवान्वयः . अतीतभावनाके कर्त्तरि पचतीति प्रयोगापत्तेः । अपाक्षीदिति प्रयोगानापत्तेश्च। नापि फले कालस्यान्वयः ,फलानुत्पत्तिदशायां व्यापारसत्वे पचतीत्यनापत्तेः,पक्ष्यतीत्यापत्तेश्च ।

व्यापारे कालान्वये आमवातजडीकृतकलेबरस्योत्थानानुकूलयत्नसत्वादुत्तिष्ठतीति प्रयोगापत्तिर्नास्ति । परयत्नस्य अज्ञानादप्रयोगात् । किञ्चिच्चेष्टादिना तदवगतौ च अयमुत्तिष्ठतीत्यत्र शक्यभावात् फलं तु नोत्पद्यते प्रयोगस्येष्टत्वात् । तत्र विभक्तिभेदनिरूपणं आकृतौ विद्यते ।

**विभक्तिभेदः:-**




**द्वितीयाविभक्त्यर्थः:-**

**कर्मणि द्वितीया(पा.सू.2.3.2)** तत्र कर्मसञ्ज्ञाविधायकंसूत्रम्-**कर्तुरीप्सिततमम् कर्म (पा.सू.1.4.49)**-क्रियाजन्यफलाश्रयं कर्मेत्यर्थ:,क्रियाजन्यफलवत्वेन कर्मण एव कर्तुरीप्सिततमत्वात् । **ओदनं पचति** इत्यत्र विक्लित्याश्रयत्वात् कर्मता । **घटं करोतीत्यत्र** उत्पत्याश्रयत्वाद्,उत्पत्तेर्धात्वर्थत्वाद् । ज्ञानातीत्यत्र आवरणभङ्गरूपधात्वर्थफलाऽश्रयत्वात् । अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्याऽवश्यकत्वात् । अतीतादेराश्रयतया च विषयतया ज्ञानाश्रयताया सत्कार्यवादसिद्धान्ताद्वोपपद्यते । तण्डुलं पच्यते स्वयमेव इत्यादौ तु विक्लित्त्यनुकूलतण्डूलान्यसमवेताग्निसंयोगरूपधात्वर्था–ऽऽश्रयत्वात् बोधः। क्रियाजन्यफलाश्रयं कर्म । इह कर्मणः सप्तविधत्वम् । तच्च–

**निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्च त्रिधा मतम् ।**

**तच्चेप्सिततमं कर्म चतुर्द्धाऽन्यत्तु कल्पितम् ।।** वा.प.
**औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम् ।**
**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ।।**वा.प.

| **क्र.सं.** | **सप्तप्रकारककर्म** | **उदाहरणानि** |
|---|---|---|
| 1. | ईप्सिततमकर्म(निर्वर्त्य) | घटं करोति । |
| 2. | ईप्सिततमकर्म(विकार्य) | काष्ठं भस्म करोति । |
| 3. | ईप्सिततमकर्म(प्राप्य) | घटं पश्यति,ग्रामं गच्छति । |
| 4. | अनीप्सितकर्म(उदासीनकर्म) | तृणं स्पृशति |
| 5. | अनीप्सितकर्म (द्वेष्यकर्म) | विषं भङ्क्ते(ओदनं भुञ्जानः) । |
| 6. | संज्ञान्तरैरनाख्यातकर्म | गां दोग्धि पयः। |
| 7. | अन्यपूर्वककर्म | क्रूरमभिक्रुद्ध्यति । |



**द्वितीयाविभक्त्युदाहरणानि**

**ईप्सिततमे-माषेषु अश्वं बध्नाति । पयसा ओदनं भुङ्क्ते ।**

**अनीप्सिते-ओदनं भुञ्जानो विषं भुङ्क्ते ।**

**द्विकर्मकधातुयोगे- गां दोग्धि पयः । बलिं याचते वसुधाम् । गर्गान् दण्डयति शतम् । व्रजम् अवरुणद्धि गाम् । माणवकं पृच्छति । पन्थानं वृक्षम् अवचिनोति फलानि । वृक्षम् अवचिनोति फलानि। माणवकं ब्रूते धर्मम् । माणवकं शास्ति धर्मम् । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं मुष्णाति शतम् । ग्रामम् नयति अजाम् । ग्रामम् हरति अजाम्। ग्रामम् कर्षति अजाम् । ग्रामम् वहति अजाम् ।**

**अण्यन्ते-**

**गत्यर्थकधातुयोगे- शत्रवः स्वर्गम् अगच्छन् । बुध्यर्थकधातुयोगे-स्वे वेदार्थम् अविदुः ।**

**प्रत्यवसानार्थकधातुयोगे-देवाः अमृतम् आश्नन् । शब्दकर्मकधातुयोगे-विधिः वेदम् अध्यैत ।**

**अकर्मकधातुयोगे- सलिले पृथ्वी आस्ते ।**

**ण्यन्ते-**

**गत्यर्थकधातुयोगे- हरिः शत्रून् स्वर्गम् अगमयत् । बुध्यर्थकधातुयोगे- हरिः वेदार्थं स्वान् अवेदयत् ।**

**प्रत्यवसानार्थकधातुयोगे-हरिः देवान् अमृतम् आशयत् । शब्दकर्मकधातुयोगे- हरिः विधिं वेदम् अध्यापयत् ।**

**अकर्मकधातुयोगे-हरिः सलिले पृथ्वीम् आसयत् ।**

**ण्यन्तजल्पभाषधातुयोगे-धर्मं पुत्रं जल्पयति । धर्मं पुत्रं भाषयति ।**

**ण्यन्तदृशिर्धातुयोगे –अर्चकः भक्तान् हरिं दर्शयति ।**

**ण्यन्तहृकृधातुयोगे- भृत्यं कटं हारयति । भृत्यं कटं कारयति ।**

**ण्यन्ताभिवादनदर्शनयोः-अर्चकः अभिवादयते देवं भक्तम् । अर्चकः दर्शयते देवं भक्तम् ।**

**अधिपूर्वकशीङ्धातुयोगे- वानराःशाखाम् अधिशेरते ।अधिपूर्वकस्थाधातुयोगे- हरिः वैकुण्ठम् अधितिष्ठति ।**

**अधिपूर्वकास्धातुयोगे-हरिः वैकुण्ठम् अध्यास्ते।अभिनिपूर्वकविशधातुयोगे-अभिनिविशते सन्मार्गम् ।**

**उपपूर्वकवस्धातुयोगे- हरिः वैकुण्ठं उपवसति। अनुपूर्वकवस्धातुयोगे- हरिः वैकुण्ठं अनुवसति।**

**अधिपूर्वकवस्धातुयोगे- हरिः वैकुण्ठं अधिवसति। आङ्पूर्वकवस्धातुयोगे- हरिः वैकुण्ठं आवसति।**

**दिवुधातुयोगे-अक्षान् (अक्षैः) दीव्यति । सञ्ज्ञाभूतम् - पितरं(पित्रा) सञ्जानीते ।**

**यज्धातुयोगे -पशुना रुद्रं यजते (पशुं रुद्राय ददाति ।) सोपसर्गक्रुध्धातुयोगे- क्रूरम् अभिक्रुध्यति ।**

**सोपसर्गद्रुहधातुयोगे- क्रूरम् अभिद्रुह्यति ।**

**गत्यर्थकर्मणि- देवदत्तः ग्रामं(ग्रामाय) गच्छति । मन्यनादरे- न त्वां तृणं (तृणाय) मन्ये ।**

**मन्यनादरे -न त्वां नावं मन्ये । न त्वाम् अन्नं मन्ये । लादेशसत्संज्ञके- हरिः कुर्वन् कुर्वाणो वा सृष्टिम् ।**

**उप्रत्यययोगे-हरिं दिदृक्षुः अलङ्करिष्णुर्वा । उकञ्प्रत्यययोगे -हरिः दैत्यान् धातुकः।**

**क्त्वाप्रत्यययोगे- जगत् सृष्ट्वा । तुमुन्प्रत्यययोगे-सुखं कर्त्तुम् ।**

क्तवतुप्रत्यययोगे-विष्णुः दैत्यान् हतवान् । शानन्प्रत्यययोगे-सोमं पवमानः।

चानश्प्रत्यययोगे- आत्मानं मण्डयमानं । शतृप्रत्यययोगे- वेदम् अधीयन् ।

तृन्प्रत्यययोगे-कर्ता लोकान् । शतृयुतद्विधातुयोगे- मुरं (मुरस्य)द्विषन् ।

भविष्यदाधमर्णयोः- व्रजं गामी । शतं दायी । सोपसर्गे- शतं(शतस्य) दीव्यति ।

अकर्मकधातुयोगे-

देशयोगे- कुरून् स्वपिति । कालयोगे- मासम् आस्ते । भावयोगे- गोदोहम् आस्ते ।




उपपदद्वितीयोदाहरणानि

उभयतः-मार्गम् उभयतः वृक्षाः सन्ति । सर्वतः-नगरं सर्वतः जलम् अस्ति ।

धिक् योगे-धिक् पापिनम् । उपर्युपरि- उपर्युपरि हरिःलोकम् अस्ति ।

अधोऽधो-मेघान् अधोऽधो पर्वताः सन्ति । अध्यधि-अध्यधि हरिःलोकम् अस्ति ।

अभितः- ग्रामं अभितः वनम् अस्ति । परितः-ग्रामं परितः वनम् अस्ति ।

समया- नगरं समया वनम् अस्ति । निकषा-ग्रामं निकषा विद्यालयः अस्ति ।

हा-हा निर्धनत्वम् । हा कृष्णाभक्तम् । प्रति-सः नगरं प्रति गच्छति ।

अन्तरा-पितरौ अन्तरा न सुखम् । अन्तरेण-हरिम् अन्तरेण न सुखम् ।

कालात्यन्तसंयोगे-मासं कल्याणी । मासम् अधीते । मासं गुडधानाः ।अध्वनात्यन्तसंयोगे-क्रोशम् अधीते । क्रोशं गिरिः। क्रोशं धूमः।

एनबन्तयोगे-दक्षिणेन ग्रामम् (ग्रामाय) विद्यालयः अस्ति । उत्तरेण ग्रामम् (ग्रामाय) विशालवृक्षः अस्ति । पूर्वेण ग्रामम् (ग्रामाय) चिकित्सालयः अस्ति । पश्चिमेन ग्रामम् (ग्रामाय) अश्वालयः अस्ति ।

भविष्यदाधमर्णयोः- व्रजं गामी । शतं दायी ।

निमित्तयोगे-किं निमित्तम् । किं पर्यायम् ।

पृथग् योगे -पृथग् रामम् (रामेण,रामात्)।

विनायोगे-विना रामम् (रामेण,रामात्)।

नानायोगे-नाना रामम् (रामेण,रामात्)।

दूरयोगे- ग्रामस्य दूरम् (दूरेण,दूरात्)।

आन्तिकयोगे-ग्रामस्य अन्तिकम् (अन्तिकेन,अन्तिकात् )।



**कर्मप्रवचनीयद्वितीयोदाहरणानि**

**लक्षणे-** शाकल्यस्य संहितामनुप्रावर्षत्। अगस्त्यमन्वसिञ्चत् प्रजाः ।

वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि विद्योतते विद्युत् ।वृक्षम् अनु विद्योतते विद्युत् ।

**तृतीयार्थे-** नदीमन्वसिता सेना ।(नद्या सह सम्बद्धा इत्यर्थः) पर्वतानुस्थिताः छात्राः। (पर्वतेन सह सम्बद्धाःइत्यर्थः)

**हीने-** अनुशाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः।

**अधिके-**उपखार्यां द्रोणः। उपनिष्के कार्षापणम् । उपशाकटायनं वैयाकरणाः। उपार्जुनं योद्धारः।

**इत्थम्भूताख्याने-** देवदत्तो मातरं प्रति साधुः। देवदत्तो मातरं परि साधुः। देवदत्तो मातरं अनु साधुः। देवदत्तो मातरं अभि साधुः।

**भागे-**यदत्र मां प्रति स्यात् । यदत्र मां परि स्यात् । यदत्र माम् अनु स्यात् ।

**अभागे-**हरिमभि वर्त्तते । भक्तो हरिमभि । देवं देवमभि सिञ्चति । वृक्षं वृक्षमभि सिञ्चति ।

वृक्षमभि विद्योतते । साधुः देवदत्तो मातरम् अभि । मातरम् अभि साधुः ।

**वीप्सायाम्-** गृहं गृहं प्रति याचते । गृहं गृहं परि याचते । गृहं गृहं अनु याचते ।

वृक्षं वृक्षं प्रति सिञ्चति । वृक्षं वृक्षं परि सिञ्चति । वृक्षं वृक्षम् अनु सिञ्चति

**सम्भावनायाम्-**अपि सिञ्चेत् मूलकसहस्रम् । अपि स्तुयात् राजानम् ।

**गर्हायाम्-**धिग्जाल्मं देवदत्तम् । अपि सिञ्चेत् पलाण्डुम् । धिगधृष्टम् असुरम् ।

**द्वितीयाविधायकसूत्राणि**

| क्र.सं. | द्वितीयाविधायकसूत्राणि |
|---|---|
| 1. | कर्मणि द्वितीया 2.3.2 |
| 2. | गत्यर्थ कर्मणिचेष्टायामनध्वनि 2.3.12 |
| 3. | संज्ञोऽन्यतरस्याम् कर्मणि2.3.22 |
| 4. | अन्तराऽन्तरेण युक्ते 2.3.4 |
| 5. | भविष्यदाधमर्णयोः 2.3.70 |
| 6. | पृथग्विनानानाभिस्तृतीयान्यतरस्याम् 2.3.32 |
| 7. | दूरान्तिकार्थेभ्यो द्वितीया च 2.3.35 |
| 8. | कर्मप्रवचनीययुक्ते द्वितीया 2.3.8 |

**द्वितीयाविधायकवार्त्तिकानि**

| क्र.सं. | द्वितीयाविधायकवार्त्तिकानि |
|---|---|
| 1. | यजेःकर्मणः करण संप्रदानस्य च (वा.) |
| 2. | नौकाकान्नशुकशृगाल वर्जेष्विति वाच्यम् (वा.) |

3. कमेरनिषेधः(वा.)
4. द्विषः शतुर्वा (वा.)
5. उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽम्रेडितातन्तेषु ततोऽन्यत्रापि दृश्यते ।। (वा.)
6. अभितः परितः समया निकषा हा प्रतियोगेऽपि (वा.)
7. निमित्तपर्याययोगे सर्वासां प्रायदर्शनम् (वा.)

**सन्दर्भग्रन्थसूची**


1. पाणिन्यष्टाध्यायी–पाणिनिमुनिः
2. काशिकावृत्तिः–जयादित्यवामनौ
3. व्याकरणमहाभाष्यम्–पतञ्जलिमुनिः
4. वैयाकरणसिद्धान्तसुधानिधिः–आचार्यश्रीविश्वेश्वरसूरि
5. वैयाकरणसिद्धान्तकौमुदी–भट्टोजीदीक्षितः
6. बृहच्छब्देन्दुशेखरः–पं.नागेशः
7.लघुशब्देन्दुशेखरः– पं.नागेशः
8.वैयाकरणभूषणसारः–पं.कौण्डभट्टः
9.शास्त्रार्थरत्नमाला–एन्.एस्.रामानुजताताचार्यः
10.लघुमञ्जूषा–पं.नागेशः
11. परमलघुमञ्जूषा–पं.नागेशः
12.सिद्धान्तकौमुदी–व्याख्याकारः– डॉ.राममुनिपाण्डेयः
13. वैयाकरणसिद्धान्तदिग्दर्शनम्–पं.बोधकुमारझाः
14.अष्टाध्यायी सहजबोधः–डॉ.पुष्पा दीक्षित
15. अष्टाध्यायी भाष्यप्रथमावृत्तिः–पं.ब्रह्मदत्तजिज्ञासु
16. अनुवादरत्नाकरः–डॉ.रमाकान्तः
17. संस्कृतसहचरः–डॉ.राधामोहनः